श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्तत्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्तत्रिंशं दशकम् ॥

## श्रीकृष्णावतारप्रसङ्गवर्णनम्

सान्द्रानन्दतनो हरे ननु पुरा दैवासुरे सङ्गरे
त्वत्कृत्ता अपि कर्मशेष वशतो ये ते न याता गतिम्।
तेषां भूतलजन्मनां दितिभुवां भारेण दूरार्दिता
भूमिः प्राप विरिञ्चमाश्रितपदं देवैः पुरैवागतैः ॥ 37.1 ॥

हा हा दुर्जनभूरिभारमथितां पाथोनिधौ पातुका -
मेतां पालय हन्त मे विवशतां सम्पृच्छ देवानिमान्।
इत्यादि प्रचुरप्रलापविवशामालोक्य धाता महीं
देवानां वदनानि वीक्ष्य परितो दध्यौ भवन्तं हरे ॥ 37.2 ॥

ऊचे चाम्बुजभूरमूनयि सुराः सत्यं धरित्र्या वचो
नन्वस्या भवतां च रक्षणविधौ दक्षो हि लक्ष्मीपतिः।
सर्वे शर्वपुरस्सरा वयमितो गत्वा पयोवारिधिं
नत्वा तं स्तुमहे जवादिति ययुः साकं तवाकेतनम् ॥ 37.3 ॥

ते मुग्धानिलशालि दुग्धजलधेस्तीरं गताः सङ्गता
यावत्त्वत्पदचिन्तनैकमनसस्तावत् स पाथोजभूः।
त्वद्वाचं हृदये निशम्य सकलानानन्दयन्नूचिवा -
नाख्यातः परमात्मना स्वयमहं वाक्यं तदाकर्ण्यताम् ॥ 37.4 ॥

जाने दीनदशामहं दिविषदां भूमेश्च भीमैर्नृपै -
स्तत्क्षेपाय भवामि यादवकुले सोऽहं समग्रात्मना।

देवा वृष्णिकुले भवन्तु कलया देवाङ्गनाश्चावनौ
    मत्सेवार्थमिति त्वदीयवचनं पाथोजभूरूचिवान्॥ **37.5** ॥

श्रुत्वा कर्णरसायनं तव वचः सर्वेषु निर्वापित -
    स्वान्तेष्वीश गतेषु तावककृपापीयूषतृप्तात्मसु।
विख्याते मधुरापुरे किल भवत्सान्निध्यपुण्योत्तरे
    धन्यां देवकनन्दनामुदवहद्राजा स शूरात्मजः॥ **37.6** ॥

उद्वाहावसितौ तदीयसहजः कंसोऽथ सम्मानय -
    न्नेतौ सूततया गतः पथि रथे व्योमोत्थया त्वद्गिरा।
अस्यास्त्वामतिदुष्टमष्टमसुतो हन्तेति हन्तेरितः
    सन्त्रासात् स तु हन्तुमन्तिकगतां तन्वीं कृपाणीमधात्॥ **37.7** ॥

गृह्णानश्चिकुरेषु तां खलमतिः शौरेश्चिरं सान्त्वनैः
    नो मुञ्चन् पुनरात्मजार्पणगिरा प्रीतोऽथ यातो गृहान्।
आद्यं त्वत्सहजं तथाऽर्पितमपि स्नेहेन नाहन्नसौ
    दुष्टानामपि देव पुष्टकरुणा दृष्टा हि धीरेकदा॥ **37.8** ॥

तावत्त्वन्मनसैव नारदमुनिः प्रोचे स भोजेश्वरं
    यूयं नन्वसुराः सुराश्च यदवो जानासि किं न प्रभो।
मायावी स हरिर्भवद्वधकृते भावी सुरप्रार्थना -
    दित्याकर्ण्य यदूनदूधुनदसौ शौरेश्च सूनूनहन्॥ **37.9** ॥

प्राप्ते सप्तमगर्भतामहिपतौ त्वत्प्रेरणान्मायया
    नीते माधव रोहिणीं त्वमपि भोः सच्चित्सुखैकात्मकः।
देवक्या जठरं विवेशिथ विभो संस्तूयमानः सुरैः
    स त्वं कृष्ण विधूय रोगपटलीं भक्तिं परां देहि मे॥ **37.10** ॥

॥ इति श्रीमन्नारायणीये सप्तत्रिंशं दशकं समाप्तम्॥